मेढ्रमध्ये शिरां विध्येत् पातयेद्वा जलौकसः ॥
सद्यो निर्हृतदोषस्य रुक्‌शोथावुपशाम्यतः ।
पाको निवार्य्यो यत्नेन शिश्नक्षयकरः स यत् ॥

वटप्ररोहार्ज्जुनजम्बुलोध्र-
पथ्याहरिद्रारचितः प्रलेपः ।
श्वयथुं तथा शोथमपाकरोति
सर्व्वोपदंशेषु ततो हितोऽयम् ॥

उपदंशेषु पक्वेषु व्रणप्रक्षालनं हितम् ।
त्रिफलायाः कषायेण भृङ्गराजरसेन वा ॥
नीलोत्पलं सकुमुदं पद्मं सौगन्धिकं तथा ।
एषां चूर्णं धूलनार्थं प्रलेपश्चात्र शस्यते ॥
बन्धूकदलचूर्णेन रजसा दाड़िमत्वचः ।
गुण्ठनं तद्व्रणे कुर्य्याल्लेपं पूगफलेन वा ॥
दहेत् कटाहे त्रिफलां तन्मसी मधुसंयुता ।
प्रलेपेनोपदंशस्य व्रणं सद्यः प्ररोहयेत् ॥

पटोलनिम्बत्रिफलाकिरात-
क्वाथं पिबेद्वा खदिरासनाभ्याम् ।
सगुग्गुलुं वा त्रिफलायुतं वा
सर्व्वोपदंशापहरः प्रयोगः” ॥ * ॥
“भूनिम्बनिम्बत्रिफलापटोल-
करञ्जधात्रीखदिरासनानाम् ।
कषायकल्कैः घृतमाशु चाज्यं
सर्व्वोपदंशापहरं प्रदिष्टम्” ॥
भूनिम्बादिघृतम् ॥ * ॥

“घृतानि यानि प्रोक्तानि कुष्ठे नाड़ीव्रणे व्रणे ।
उपदंशे प्रयोज्यानि सेकाभ्यञ्जनभोजने ॥
क्षारसूत्रेण संछिद्य लिङ्गवर्त्तिमशेषतः ।
दहेच्च तां ततस्ताभ्यां चिकित्सां व्रणवच्चरेत्” ॥
इत्युपदंशाधिकारः । इति भावप्रकाशः ॥ * ॥
अपि च ।
“पटोलनिम्बत्रिफलागुड़ूचीक्वाथमाविशेत् ।
सगुग्गुलुं सखदिरमुपदंशो विनश्यति” ॥
ग्रन्थान्तरे प्रथमार्द्धे “पटोलनिम्बगुड़ूचीमरिच-क्वाथमापिबेत्” । इति च पाठः ॥
“दहेत् कटाहे त्रिफलां सा मसी मधुसंयुता ।
उपदंशे प्रलेपोऽयं सद्यो रोपयते व्रणम्” ॥ * ॥
“त्रिफलानिम्बभूनिम्बकरञ्जखदिरादिभिः ।
कल्कैः क्वाथैर्घृतं पक्वमुपदंशहरं परम्” ॥
इति गारुड़े १७५ अध्यायः ॥
(अन्यच्चास्य सनिदानसम्प्राप्तिकं लक्षणमाह । यथा,
“स्त्रीव्यवायनिवृत्तस्य सहसा भजतोऽथवा ।
दोषाध्युषितसंकीर्णमलिनाणुरजःपथाम् ॥
अन्ययोनिमनिच्छन्तीमगम्यां नवसूतिकाम् ।
दूषितं स्पृशतस्तोयं रतान्तेष्वपि नैव वा ॥
विवर्द्धयिषया तीक्ष्णान् प्रलेपादीन् प्रयच्छतः ।
मुष्टिदन्तनखोत्पीड़ाविषवच्छूकपातनैः ॥
वेगनिग्रहदीर्घातिखरस्पर्शविघट्टनैः ।
दोषा दुष्टा गता गुह्यं त्रयोविंशतिमामयान् ॥
जनयन्त्युपदंशादीन् उपदंशोऽत्र पञ्चधा ।
पृथक्‌दोषैः सरुधिरैः समस्तैश्चात्र मारुतात् ॥
मेढ्रशोफे रुजश्चित्राः स्तम्भत्वक् परिपोटनम् ॥१॥
पक्वोदुम्बरसंकाशः पित्तेन श्वयथुर्ज्वरः ॥ २ ॥
श्लेष्मणा कठिनः स्निग्धः कण्डूमान् शीतलो गुरुः॥३॥
शोणितेनासितस्फोटसम्भवोऽस्रस्रुतिर्ज्वरः ॥ ४ ॥
सर्व्वजे सर्व्वलिङ्गत्वं श्वयथुर्मुष्कयोरपि” ॥ ५ ॥

असाध्यलक्षणं यथा ।

“तीव्रा रुगाशुपचनं दरणं क्रिमिसम्भवः ।
याप्यो रक्तोद्भवस्तेषां मृत्यवे सन्निपातजः” ॥
इति वाभटे उत्तरस्थाने ३३ अध्याये ।

अस्य चिकित्सा च यथा ॥

“मेढ्रमध्ये शिरां विध्येदुपदंशे नवोत्थिते ।
शीतां कुर्य्यात् क्रियां शुद्धिं विरेकेण विशेषतः ॥
तिलकल्कघृतक्षौद्रैर्लेपः पक्वे तु पाटिते ।
जम्ब्वाम्रसुमनोनीपश्वेतकाम्बोजिकाङ्कुरान् ॥
शल्लकीबदरीविल्वपलाशतिनिशोद्भवाः ।
त्वचः क्षीरिद्रुमाणाञ्च त्रिफलाञ्च जले पचेत् ॥
सक्वाथः क्षालनं तेन पक्वतैलञ्च रोपणम् ।
तुत्थगैरिकलोध्रैलामनोह्वालरसाञ्जनैः ॥
हरेणुपुष्पकाशीससौराष्ट्रीलवणोत्तमैः ।
लेपः क्षौद्रयुतैः सूक्ष्मैरुपदंशव्रणापहः ॥
कपाले त्रिफला दग्धा सघृता रोपणं परम् ।
सामान्यं साधनमिदं प्रतिदोषन्तु शोफवत् ॥
न च याति यथा पाकं प्रयतेत तथा भृशम् ।
पक्वैः स्नायुशिरामांसैः प्रायो नश्यति हि ध्वजः” ॥
इति वाभटे उत्तरस्थाने ३४ अध्यायः ॥

तत्रातिमैथुनादतिब्रह्मचर्य्याद्वा तथा ब्रह्मचारिणीं चिरोत्सृष्टां रजस्वलां दीर्घरोमां कर्कशरोमां सङ्कीर्णरोमां निगूढ़रोमामल्पद्वारां महाद्वारामप्रियामकामामचौक्ष्यसलिलप्रक्षालितयोनिमक्षालितयोनिं योनिरोगोपसृष्टां स्वभावतो वा दुष्टयोनिं वियोनिं वा नारीमत्यर्थमुपसेवमानस्य तथा करज-दशन-विष-शूकनिपातनादर्द्दनाद्धस्ताभिघाताच्चतुष्पदीगमनादचौक्ष्यसलिलप्रक्षालनादवपीड़नाच्छुक्रमूत्रवेगविधारणान्मैथुनान्ते वाऽप्रक्षालनादिभिर्मेढ्रमागम्य प्रकुपिता दोषाः क्षतेऽक्षते वा श्वयथुमुपजनयन्ति तमुपदंशमित्याचक्षते ॥

स पञ्चविधस्त्रिभिर्दोषैः पृथक् समस्तैरसृजा चैकः ॥

तत्र वातिके पारुष्यं त्वक्परिपुटनं स्तब्धमेढ्रता परुषशोफता विविधाश्च वातवेदनाः ॥ १ ॥

पैत्तिके ज्वरः श्वयथुः पक्वोडुम्बरसङ्काशस्तीव्रदाहः क्षिप्रपाकः पित्तवेदनाश्च ॥ २ ॥

श्लैष्मिके श्वयथुः कण्डूमान् कठिनः स्निग्धः श्लेष्मवेदनाश्च ॥ ३ ॥

रक्तजे कृष्णस्फोटप्रादुर्भावोऽत्यर्थमसृक्‌प्रवृत्तिः पित्तलिङ्गान्यत्यर्थं ज्वरदाहौ शोषश्च याप्यस्त्वेव कदाचित् ॥ ४ ॥

सर्व्वजे सर्व्वलिङ्गदर्शनमवदरणं शेफसः क्रिमिप्रादुर्भावो मरणञ्चेति ॥ ५ ॥
इति सुश्रुते निदानस्थाने १२ अध्यायः ॥

चिकित्साविशेषो यथा ।

“यदि वा दुर्ब्बलो जन्तुर्न वा प्राप्तं विरेचनम् ॥
निरूहेण हरेत् तस्य दोषानत्यर्थमुच्छ्रितान् ।
प्रपौण्डरीकयष्ट्याह्ववर्षाभू-कुष्ठदारुभिः ॥
सरलागुरुरास्नाभिर्वातजं संप्रलेपयेत् ।
निचुलैरण्डबीजानि यवगोधूमशक्तवः ॥
एतैश्च वातजं स्निग्धैः सुखोष्णैः संप्रलेपयेत् ।
प्रपौण्डरीकपूर्व्वैश्च द्रव्यैः सेकः प्रशस्यते ॥
गैरिकाञ्जनयष्ट्याह्वसारिवोशीरपद्मकैः ।
सचन्दनोत्पलैः स्निग्धैः पैत्तिकं संप्रलेपयेत् ॥
पद्मोत्पलमृणालैश्च ससर्ज्जार्ज्जुनवेतसैः ।
सर्पिःस्निग्धैः समधुकैः पैत्तिकं सम्प्रलेपयेत् ॥
सेचयेच्च घृतक्षीरशर्करेक्षुमधूदकैः ।
अथ वापि सुशीतेन कषायेण वटादिना ॥
शालाश्वकर्णाजकर्णधवत्वग्भिः कफोत्थितम् ।
सुरापिष्टाभिरुष्णाभिः सतलाभिः प्रलेपयेत् ॥
रजन्यतिविषामुस्तसरलासुरदारुभिः ।
सपत्रपाठापत्तूरैरथ वा सम्प्रलेपयेत् ॥
करवीरस्य पत्राणि जात्यारग्वधयोस्तथा ।
प्रक्षालने प्रयोज्यानि वैजयन्त्यर्कयोरपि ॥
गोजिविड़ङ्गयष्टीभिः सर्व्वगन्धैश्च संयुतम् ।
एतत् सर्व्वोपदंशेषु श्रेष्ठं रोपणमिष्यते ॥
सर्ज्जिकातुत्थकाशीसं शैलेयञ्च रसाञ्जनम् ।
मनःशिलासमैश्चूर्णं व्रणवीसर्पनाशनम् ॥
गुञ्जान्दग्ध्वा कृतं भस्म हरितालं मनःशिला ।
उपदंशविसर्पाणामेतच्छान्तिकरं परम् ॥
मार्कवस्त्रिफलादन्तीताम्रचूर्णमयो रजः ।
उपदंशं निहन्त्येष वृक्षमिन्द्राशनिर्यथा ॥
उपदंशद्वयेऽप्येतां प्रत्याख्यायाचरेत् क्रियाम् ।
तयोरेव च या योग्या वीक्ष्य दोषबलाबलम् ॥
उपदंशे विशेषेण घृतणु भूयस्त्रिदोषजे ।
दुष्टव्रणविधिं कुर्य्यात् कुथितं मेहनं त्यजेत् ॥
जाम्बौष्ठेनाग्निवर्णेन पश्चाच्छेषं दहेद्भिषक् ।
सम्यग्दग्धञ्च विज्ञाय मधुसर्पिः प्रयोजयेत् ॥
शुद्धे च रोपणं दद्यात् कल्कं तैलं हितञ्च यत्” ।
इति च सुश्रुते चिकित्सितस्थाने १९ अध्याये ॥
“लवङ्गं मरिचं शुण्ठी विड़ङ्गञ्च वचान्तथा ।
गन्धकं श्वेतखदिरं जातीकोषफले तथा ।
समभागकृतं सर्व्वं मधुना कारयेद्वटीम् ॥
शाणमात्रान्तु मतिमान् योजयेदविकल्पितः ।
अनुपानं दुग्धसारं ततस्ताम्बूलभक्षणम्” ॥
इति उपदंशारी रसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे उपदंशाधिकारः ॥*॥

अत्र पथ्यानि यथा ॥

छर्द्दिर्विरेको ध्वजमध्यनाड़ी-
वेधो जलौकःपरिपातनञ्च ।
सेकः प्रलेपो यवशालयश्च
धन्वामिषं मुद्गरसो घृतानि ॥ १ ॥
कठिल्लकं शिग्रुफलं पटोलं
शालिञ्चशाकं नवमूलकञ्च ।
तिक्तं कषायं मधुकूपवारि
तैलञ्च हन्यादुपदंशरोगम् ॥ २ ॥

अपथ्यानि यथा ॥

“दिवानिद्रां मूत्रवेगं गुर्व्वन्नं मैथुनं गुड़म् ।
आयासमम्लं तक्रञ्च वर्ज्जयेदुपदंशवान् ॥ ३ ॥